[माणवकं] उपनयमानः-[तत्त्वं] नयमानः, [कर्मकरान्] उपनयमानः, [करं] विनयमानः, [शतं] विनयमानः, [क्रोधं] [1]विनयमानः, नाययमानः, निनीषमाणः, नेनीयमानः ;

नेष्यमाणः, नाययिष्यमाणः, निनीषिष्यमाणः, नेनीयिष्यमाणः ;

[2]अग्रणीः, ग्रामणीः-ग्रामण्यौ-ग्रामण्यः, [A]तिथिप्रणीः, सेनानीः[B] ; —

नीतः-नीतम्-नीतवान् , नायितः, निनीषितः, नेनीयितः-तवान् ;

[3]नायः, अनुनयः-नयः, [4]उष्ट्रप्रणायः-[5]नेष्टा-नेता, [6]नेत्रम् , [7]अनुनायकः, अनुनायिका, नायः, निनीषुः, अनुनिनीषुः,[C] [8]नेन्यः ;

नेतव्यः, नाययितव्यः, निनीषितव्यः, नेनीयितव्यः ;

नयनीयः, नायनीयः निनीषणीयः, नेनीयनीयः ;

---

1. 'कर्तृस्थे चाशरीरे कर्मणि' (1-3-37) इति शानच्। क्रोधम् अपगमयन् इत्यर्थः।

2. 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (3-2-61) इति क्विप्। 'अग्रग्रामाभ्यां **नयतेर्णो** वाच्यः' इति **वचनेन** णत्वम्। **नयते**रित्युक्तेः **'ग्रामणायः'** इति कर्मण्यण्यपि णत्वं भवति। स्पष्टमिदं 'वाऽसरूपोऽस्त्रियाम्' (3-1-94) इत्यत्र **भाष्ये**।

3. 'दुन्योरनुपसर्गे' (3-1-142) इति कर्तरि णप्रत्ययः। उपसृष्टात्तु पचाद्यजेव। केवलात् **नी**धातोः कर्तरि **नय** इति प्रयोगस्तु बाहुलकात् बोध्यः। 'दुन्योः—' (3-1-142) इत्यत्र, 'वेति **केचित्**' इति **प्रक्रियाकौमुदी**।

4. 'कर्मण्यण्' (3-2-1) इति प्रपूर्वक**नी**धातोरणि, 'उपसर्गादसमासे—' (8-4-14) इति णत्वे रूपम्।

5. 'तृन्' (3-2-135) इति ताच्छीलिके तृनि, '**नयतेः** षुक् च' (वा. 3-2-135) इति षुगागमे च रूपम्। **नेष्टा**=ऋत्विग्विशेषः।

6. 'दाम्नीश—' (3-2-182) इत्यादिना करणे ष्ट्रन्प्रत्ययः। **नेत्रम्**=चक्षुरिन्द्रियम्।

7. 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (3-3-10) इति क्रियार्थायां क्रियायां सत्यां भविष्यति ण्वुल्। स्त्रियाम्, 'प्रत्ययस्थात्—' (7-3-44) इतीत्वम्।

8. यङन्तात् पचाद्यचि (3-1-134) अङ्गस्यानेकाच्त्वात् 'एरनेकाचः—' (6-4-82) इति यणादेशः।

A. 'सायन्तनीं **तिथिप्रण्यः** पङ्कजानां दिवातनीम्'। भ. का. 5.65.

B. 'सार्धं कुमार**सेनान्या** शून्यश्चासीति को **नयः** ॥' भ. का. 5.7.

C. 'पराक्रमज्ञः प्रियवन्तितिर्तं नत्रः क्षितीन्द्रोऽ**नु**ने**नी**षुरूचे ॥' भ. का. 2.51.